## ॥ गुरुस्तोत्रम् ॥ ॥ gurustotram ॥

*Rāmulu Gajavāḍa, Sanskrit Teacher*

ॐ गुरुर्ब्रह्मा गुरुर्विष्णुः गुरुर्देवो महेश्वरः

गुरुरेव परं ब्रह्म तस्मै श्रीगुरवे नमः ॥ १

**oṁ gururbrahmā gururviṣṇuḥ gururdevo maheśvaraḥ |**
**gurureva paraṁ brahma tasmai śrīgurave namaḥ || 1**

अज्ञान तिमिरान्धस्य ज्ञानाञ्जलशलाकया

चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः ॥ २

ajñānatimirāndhasya jñānāñjalaśalākayā |
cakṣurunmīlitaṁ yena tasmai śrīgurave namaḥ || **2**

अखण्डमण्डलाकारं व्याप्तं येन चराचरम्

तत्पदं दर्शितं येन तस्मै श्रीगुरवे नमः ॥ ३

**akhaṇḍamaṇḍalākāraṁ vyāptaṁ yena carācaram |**
**tatpadaṁ darśitaṁ yena tasmai śrīgurave namaḥ || 3**

स्थावरं जङ्गमं व्याप्तं येन कृत्स्नं चराचरम्

तत्पदं दर्शितं येन तस्मै श्रीगुरवे नमः ॥ ४

**sthāvaraṁ jaṅgamaṁ vyāptaṁ yena kṛtsnaṁ carācaram |**
**tatpadaṁ darśitaṁ yena tasmai śrīgurave namaḥ || 4**

चिद्रूपेण परिव्याप्तं त्रैलोक्यंच चराचरम्।

तत्पदं दर्शितं येन तस्मै श्रीगुरवे नमः ॥ ५

**cidrūpeṇa parivyāptaṁ trailokyañca carācaram |**
**tatpadaṁ darśitaṁ yena tasmai śrīgurave namaḥ || 5**

सर्वश्रुतिशिरोरत्न समुद्भासितमूर्तये ।

वेदान्ताम्बुजसूर्याय तास्मै श्रीगुरवे नमः ॥ ६

**sarvaśruti-śiroratna-samudbhāsita-mūrtaye |**
**vedāntāmbujasūryāya tāsmai śrīgurave namaḥ || 6**

चैतन्यः शाश्वतः शान्तो व्योमातीतो निरञ्जनः ।

बिन्दुनादकालातीतः तस्मै श्रीगुरवे नमः ॥ ७

**caitanyaḥ śāśvataḥ śānto vyomātīto-nirañjanaḥ |**
**bindunādakālātītaḥ tasmai śrīgurave namaḥ || 7**

ज्ञानशक्तिसमारूढः तत्त्वमालाविभूषितः ।

भुक्तिमुक्तिप्रदाता च तस्मै श्रीगुरवे नमः ॥ ८

**jñāna-śakti-samārūḍhaḥ-tattva-mālā-vibhūṣitaḥ**
**bhukti-mukti-pradātā ca tasmai śrīgurave namaḥ || 8**

अनेकजन्मसम्प्राप्त कर्मबन्धविदाहिने ।

आत्मज्ञान प्रदानेन नेन तस्मै श्रीगुरवे नमः ॥ ९

aneka-janma-samprāpta-karmabandha-vidāhine |
ātma-jñāna pradānena tasmai śrīgurave namaḥ || 9

शोषणं भवसिन्धोश्च प्रापणं सारसम्पदः ।

यस्य पादोदकं सम्यक् तस्मै श्रीगुरवे नमः ॥ १०

**śoṣaṇaṁ bhavasindhośca prāpaṇaṁ sārasampadaḥ|**
**yasya pādodakaṁ samyak tasmai śrī-śrigurave namaḥ ||10**

न गुरोरधिकं तत्त्वं न गुरोरधिकं तपः ।

तत्त्वज्ञानात् परं नास्ति तस्मै श्रीगुरवे नमः ॥ ११

**na guror-adhikaṁ tattvaṁ na guror-adhikaṁ tapaḥ |**
**tattvajñānāt paraṁ nāsti tasmai śrī-gurave namaḥ || 11**

मन्नाथः श्रीजगन्नाथो मद्गुरुः श्रीजगत्गुरुः ।

मदात्मा सर्वभूतात्मा तस्मै श्रीगुरवे नमः ॥ १२

**mannāthaḥ śrījagannātho madguruḥ śrījagatguruḥ|**
**madātmā sarvabhūtātmā tasmai śrīgurave namaḥ 12**

गुरादिरनादिश्च गुरुः परमदैवतम्

गुरोः परन्तरं नास्ति तस्मै श्रीगुरवे नमः ॥ १३

**gurādiranādiśca guruḥ paramadaivatam |**
**guroḥ parantaraṁ nāsti tasmai śrīgurave namaḥ || 13**

ब्रह्मानन्दं परमसुखदं केवलं ज्ञानमूर्तिं

द्वन्द्वातीतं गगनसदृशं तत्त्वमस्यादिलक्ष्यम् ।

एकं नित्यं विमलमचलं सर्वधीसाक्षिभूतं

भावातीतं त्रिगुणरहितं सत्गुरुं तं नमामि ॥ १४

**brahmānandaṁ paramasukhadaṁ kevalaṁ jñānamūrtiṁ**
**dvandvātītaṁ gaganasadṛśaṁ tattvamasyādilakṣyam |**
**ekaṁ nityaṁ vimalamacalaṁ sarvadhīsākṣibhūtaṁ**
**bhāvātītaṁ triguṇarahitaṁ satguruṁ taṁ namāmi || 14**

त्वमेव माता च पिता त्वमेव  त्वमेव बन्धुश्च सखा त्वमेव ।

त्वमेव विद्या द्रविणं त्वमेव  त्वमेव सर्वं मम देवदेव ॥

**tvameva mātā ca pitā tvameva   tvameva bandhuśca sakhā tvameva |**
**tvameva vidyā draviṇaṁ tvameva  tvameva sarvaṁ mama devadeva ||**